# Sudarshanachakrakritam Vishnu Stotram

# सुदर्शनचक्रकृतं विष्णुस्तोत्रम्

## Document Information

Text title : Sudarshanachakrakritam Vishnu Stotram

File name : sudarshanachakrakRRitaMviShNustotram.itx

Category : vishhnu, vishnu, tAmraparNImAhAtmya, stotra

Location : doc_vishhnu

Proofread by : PSA Easwaran

Description/comments : tAmraparNImAhAtmya | adhyAya 59/40-53||

Latest update : December 13, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 13, 2025

*sanskritdocuments.org*

# सुदर्शनचक्रकृतं विष्णुस्तोत्रम्

नमस्ते देवदेवेश वासुदेवाय विष्णवे ।
नारायणाय नालीकनयनाय नमो नमः ॥ ४० ॥

नाथ नारायण विभो नलिनायतलोचन ।
प्रसीद करुणामूर्ते प्रसीद जगतां गुरो ॥ ४१ ॥

यमेकमीशमाद्यन्तमनन्तमकुतोभयम् ।
अक्षरमनिर्देश्यं शरणं यामि शाश्वतम् ॥ ४२ ॥

पुराणमाद्यं पुरुषं वृषसेनं वृषाकपिम् ।
वेदान्तवेद्यं विश्वस्य जनितारमुपास्महे ॥ ४३ ॥

तारकः परमो योगी योगिध्येयाङ्घ्रिपङ्कजः ।
स मे गतिरनन्तात्मा सर्वसाक्षी जगद्गुरुः ॥ ४४ ॥

गुणातीतः परः शुद्धो हंसाख्यः प्रपितामहः ।
श्रुतिकर्मः पुमान् साक्षादाविरस्तु पुरो हरिः ॥ ४५ ॥

अणोरणीयानात्मा च महतोऽपि महान् महान् ।
ममैव दृशि सम्भूयान्मोहान्धध्वान्तभास्करः ॥ ४६ ॥

श्यामो हिरण्यपरिधिः वनमालाविभूषितम् ।
श्रीपतिं शरणं यामि विश्वस्यास्यैवहेतुकम् ॥ ४७ ॥

आलोलतुलसीदाममारूढविनतासुतम् ।
ज्योतिरिन्दीवरश्याममाविरस्तु ममाग्रतः ॥ ४८ ॥

नमो नमः पुराणाय पुरुषायादिवेधसे ।
सतां सन्मार्गबन्धूनां परित्राणाय साधवे ॥ ४९ ॥

सत्त्वमेकाक्षरं ज्योतिराकारः खगरूपकः ।
यत्तमन्तस्स्मराम्येतत् पञ्चमस्वरमक्षरः ॥ ५० ॥

खगो भोक्ता च कर्मात्मा पुरुषो व्यञ्जनात्मकः ।
ऊर्ध्वतिर्यग्गतः स्वान्तः केशवो दयितो मम ॥ ५१॥

शेषाङ्कशायिनमशेषगुरुं पुराणं
नारायणं त्रिजगतां प्रणतापवर्गम् ।
नाथं व्रजामि शरणं करुणामृताब्धिं
नास्त्यत्र मे विशति चित्तमिदं मुकुन्दात् ॥ ५२॥

इत्थं स्तुवति वै तस्मिन् चक्रराजे सुदर्शने ।
प्रादुर्बभूव भगवान् प्रसन्नात्मा जनार्दनः ॥ ५३॥

इति ताम्रपर्णीमाहात्म्ये ५९-अध्यायान्तर्गतं
सुदर्शनचक्रकृतं विष्णुस्तोत्रं सम्पूर्णम् ।

ताम्रपर्णीमाहात्म्य । अध्याय ५९/४०-५३॥

tAmraparNImAhAtmya . adhyAya 59/40-53..

Proofread by PSA Easwaran

*Sudarshanachakrakritam Vishnu Stotram*
pdf was typeset on December 13, 2025

Please send corrections to *sanskrit@cheerful.com*